This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M 307 विषय काव्य
नाव. कुमारसंभवम (२सर्ग) मुद्रित
लेखक/लिपीकार कालिदासकृत.
पृष्ठ 13 काळ शके 1793 पूर्ण/अपूर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ अथ कुमारसम्भवे द्वितीयसर्ग प्रारंभः ॥ श्री ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कु·सं·
१

तस्मिन्निति। तस्मिन् काले पार्वतीशुश्रूषाकाले तारकेण तारकनाम्ना वज्राणस्वपुत्रेण केनचिदसुरेण विप्रकृताः उपप्लुताः दिवमोकः स्थानं येषां ते दिवौकसः | स·
देवाः। दिवं स्वर्गेऽन्तरीक्षेचेति विश्वः। द्यौः श्लोक इति पक्षे पृषोदरादित्वात्साधुः। तुरं त्वरितं साहयत्यभिभवतीति तुराषाट्। साहयतेश्चौरादिकात् क्विप्। नहि | २
वृति वृषि- (६,३,११६ पा०) इत्यादिना पूर्वपदस्य दीर्घः प्रकृतिग्रहणे प्रातिपदिकस्यापि ग्रहणात्। मुग्धबोधकारस्तु तुराशब्दं षाबन्तइत्याचष्टे। तं तुरासाहं देवे
न्द्रम्। अजादिषु साङ्‌रूपस्याभावात् सहेः साडः सः (८,३,५६ पा०) इति षत्वं न भवति। पुरोधाय पुरस्कृत्य स्वयम्भुवोब्रह्मण इदं स्वायम्भुवम्। संज्ञापूर्व

तस्मिन विप्रकृताःकालेतारकेणदिवौकसः। तुरासाहंपुरोधाय धामस्वायम्भुवंययुः॥१॥ तेषामाविरभूद्ब्र-
ह्मापरिम्लानमुखश्रियाम्। सरसांसुप्तपद्मानां प्रातर्दीधितिमानिव ॥२॥

कविधेरनित्यत्वात् औगुणः (६,४,१४६
पा०) इति गुणो न। धाम स्थानं ययुः ब्रह्मलोकं जग्मुरित्यर्थः १ तेषामिति। परिम्लाना परिक्षीणा मुखश्रीर्मुखकान्तिर्येषां तथोक्तानां तेषां देवानां ब्रह्मा सु
प्तपद्मानां मुकुलितारविन्दानां सरसां प्रातर्दीधितिमान् सूर्य्यइव आविरभूत् प्रकाशोऽभूदित्यर्थः। प्रकाशे प्रादुराविः स्यादित्यमरः। सूर्योपमानेन तेषां म्ला
निहरणत्वं सूचितम्। अत्रोपमालङ्कारः। तल्लक्षणन्तु। स्वतःसिद्धेन भिन्नेन सम्मतेन च धर्मतः। साम्यमन्येन वर्ण्यस्य वाच्यञ्चेदेकगोपमेति २ अथेति | १
अथ आविर्भावानन्तरं सर्वे ते देवाः सर्वतः समन्ततोमुखानि यस्य तं सर्वतोमुखं चतुर्मुखमित्यर्थः। वाचां विद्यानामीशं सर्वस्य जगतो धातारं स्रष्टारं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्रह्माणं प्रणिपत्य नमस्कृत्य अर्थादनपेताभिरर्थ्याभिः अर्थयुक्ताभिरित्यर्थः। धर्मपथ्यर्थन्यायादनपेते (४,४,९२,पा०) इति यत्प्रत्ययः। वाग्भिरुपन- स्थिरे तुष्टुवुरित्यर्थः। उपाद्देवपूजासङ्गतिकरणमित्रकरणपथिष्विति (१,३,२५,पा०वा०) वक्तव्य मित्यात्मनेपदम् ३ स्तुतिप्रकारमाह नम इत्यादिभि र्द्वादशभिः श्लोकैः। नम इति। हे भगवन्नित्यध्याहार्य्यं व्याख्येयम्। सृष्टेः प्राक्। अन्यारादित्यादिना (२,३,२९ पा०) अञ्चूत्तरपदयोगेन पञ्चमी। केवलात्मने एकरूपाय आत्मा वा इदमेक एवाग्र आसीदिति श्रुतेः निर्णीते केवलमिति त्रिलिङ्गं त्वेककृत्स्नयोरित्यमरः। पश्चात् सृष्टिप्रवृत्तिकाले।

अथ सर्वस्य धातारं ते सर्वे सर्वतोमुखम्। वागीशं वाग्भिरर्थ्याभिः प्रणिपत्योपतस्थिरे ॥३॥ नमस्त्रिमूर्त्तये तु भ्यं प्राक् सृष्टेः केवलात्मने। गुणत्रयविभागाय पश्चाद्भेदमुपेयुषे ॥४॥ यदमोघमपामन्तरुप्तं बीजमज त्वया। अत श्चराचरं विश्वं प्रभवस्तस्य गीयसे ॥५॥

विभज्यते अनेनेति विभागः गुणानां सत्वादीनां त्रयमेव विभागो यस्य तस्मै। गुणाः सत्त्वं रजस्तम इत्यमरः। भेदम् उपाधिं स्रष्टृत्वादिकमित्यर्थः उपेयुषे प्राप्तवते। उपेयिवाननाश्वाननूचानश्चेति (३,२,१०९ पा०) निपातः। अत एव त्रिमूर्त्त ये ब्रह्मविष्णुरुद्ररूपिणे तुभ्यं नमः। नमः स्वस्तीत्यादिना (२,३,१६ पा०) चतुर्थी। उक्तञ्च। नमो रजोजुषे सृष्टौ स्थितौ सत्त्वमयाय च। तमोरूपाय सं हारे त्रिरूपाय स्वयम्भुवे इति ४ यदिति। न जायत इत्यजः हे अज अपां जलानाम् अन्तः त्वया यदमोघम् अवन्ध्यं बीजं वीर्य्यमुप्तं निक्षिप्तम्।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कु॰ सं॰ २

मुक्तमिति पाठे विसृष्टमित्यर्थः। शुक्रं तेजो रेतसी च बीजवीर्य्येन्द्रियाणि चेत्यमरः। अनस्ते बीजात् चराचरम् स्थावरजङ्गमात्मकम्। समाहारे द्वन्द्वैकव द्भावः। विश्वं जगत् उत्पन्नमिति शेषः। तस्य विश्वस्य प्रभवत्यस्मादिति प्रभवः कारणं गीयसे। अत्र मनुः। अप एव ससर्ज्जादौ तासु बीजमवासृजत् तद ण्डमभवद्धैमं सहस्रांशुसमप्रभमिति।(१,अ०८,९ श्लो०) अदश्चराचरं विश्वं प्रसवस्तस्य गीयते इति पाठे अदइदं चराचरं विश्वं तस्य बीजस्य प्रसवो गीयते लोके इति शेषः ५ तिसृभिरिति। एकः सृष्टेः प्राक् केवलः त्वं तिसृभिरवस्थाभिः त्रैगुण्यमयीभिः हरिहरब्रह्मस्वरूपाभिः महिमानं निजशक्तिम् उदीरय

तिसृभिस्त्वमवस्थाभिर्महिमानमुदीरयन्। प्रलयस्थितिसर्गाणामेकःकारणतांगतः॥६॥स्त्रीपुंसावात्मभा-
गौते भिन्नमूर्त्तेः सिसृक्षया। प्रसूतिभाजः सर्गस्य तावेव पितरौ स्मृतौ ॥७॥

न् विजृम्भयन् प्रलयस्थितिसर्गाणाम् अंत स्थित्युत्पत्तीनां कारणतां गतः। इदं पश्चाद्भेदमुपेयुषे इत्यस्य विवरण मतोन गतार्थत्वदोषः ६ भूतसृष्टिकर्तृत्वमुक्त्वा मिथुनसृष्ट्यर्थं मूर्तिमतोब्र ह्मणो भेदमाह। स्त्रीपुंसाविति। स्त्री च पुमांश्च स्त्रीपुंसौ। अचतुरेत्यादिना (५.४.७७पा०) अच् प्रत्ययान्तो निपातः। सिसृक्षया स्रष्टुमिच्छया भिन्न मूर्त्तेर्द्विधाकृतविग्रहस्य ते तव आत्मनो देहस्य भागावात्मभागौ। आत्मा जीवे धृतौ देहे स्वभावे परमात्मनीति विश्वः। तावेव भागौ प्रकृतिभाजः उत्पत्ति भाजः। सृज्यत इति सर्गः तस्य निजसृष्टेरित्यर्थः माता च पिता च पितरौ पितामात्रे (१.२.७०पा०) त्येकशेषः। स्मृतौ सद्भिरितिशेषः। अत्र मनुः। २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्विधा कृत्वात्मनो देहमर्धेन पुरुषोऽभवत् । अर्द्धेन नारी तस्यां स विराजमसृजत्प्रभुरिति (१ अ०, ३२ श्लो०) ७ स्वकालेति । स्वकालस्य परिमाणेन ।
चतुर्युगसहस्राणि ब्रह्मणो दिनमुच्यत इत्युक्तरूपेण व्यक्तं विभक्तं रात्रिन्दिवं रात्र्यहनी यस्य तस्य । यद्यप्यचतुरादिसूत्रेण रात्रौ च दिवा च रात्रिन्दि
वमिति सप्तम्यर्थे वृत्तौ द्वन्द्व इत्युक्तं तथापि दोषामन्यमहर्दिवा मन्यारात्रिरित्यादौ कर्म्मवत्त्रापि प्रातिपदिकार्थवृत्तित्वं कथञ्चित्प्रयोगबलादाश्रय-
णीयम् । तौ च यौ तु स्वभावबोधौ तावेव भूतानां प्रलयोदयौ संहारसृष्टी । यदाहुः । यदा स देवो जागर्त्ति तदेव चेष्टते जगत् । यदा स्वपिति शान्तात्मा त

स्वकालपरिमाणेन व्यक्तरात्रिन्दिवस्य ते । यौ तु स्वप्नावबोधौ तौ भूतानां प्रलयोदयौ ॥ ८ ॥ जगद्योनिरयोनिस्त्वं
जगदन्तो निरन्तकः । जगदादिरनादिस्त्वं जगदीशो निरीश्वरः ॥ ९ ॥

दा सर्वं प्रलीयते (म० १ अ०, ५२ श्लोक०) इति । ए
तच्च दैनन्दिनसृष्टिप्रलयाभिप्रायकं महाप्रलयस्य ब्रह्मणो वर्षशतान्ते भावित्वात् ८ जगदिति हे भगवन् त्वं जगद्योनिः जगत्कारणम् स्वयमयो-
निः चात्वारित्वाद कारणकः । त्वम् । अन्तयतीत्यन्तः पचाद्यच् । जगतः अन्तः जगतां हर्त्ता स्वयं निरन्तकः नित्यत्वादन्तरहितः । त्वं जगतामादिः जगदा
दिः सृष्टेः प्रागपि सन्नित्यर्थः अतएव त्वमनादिः आदिरहितः त्वं जगतामीशः नियन्ता स्वयं निरीश्वरः अनियम्य इत्यर्थः । यतो वा इमानि भूतानि
जायन्ते इत्यादिश्रुतिरेवात्र प्रमाणम् । अत्रायोनिरित्यादौ नञ्तत्पुरुषाश्रयणे विरोधः बहुव्रीहिणा तु तत्परिहार इति विरोधाभासालङ्कारः । यथा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कु·सं· हुः। विरोधाभासत्वे विरोधइति ९ ननु तु न प्रपञ्चस्येव जन्मतिरोधानज्ञानेषु परापेक्षेत्याह आत्मानमिति। हे भगवन् त्वं आत्मानं लोकानुग्रहार्थे स·
२ ब्रह्मरूपेणोत्सिपादयिषितं स्वस्वरूपम् आत्मनैव वेत्सि जानासि सर्व्वापि क्रिया कर्त्तव्यार्थज्ञानपूर्व्विकेति भावः। तथात्मानम् आत्मनैव आत्मन्येवेत्यत्रा २
पि सम्बध्यते स्वस्मिन्नेव सृजसि अधिष्ठानमपि स्वयमेवेत्यर्थः। स्वे महिम्नि प्रतिष्ठितमिति श्रुतेः। कृतिना समर्थेन इदं सर्व्वत्र सम्बध्यते। आत्मना
त्मनैव आत्मन्येव प्रलीयसे स्वस्मिन्नेव प्रलीनो भवसि लीयतेर्दैवादिकात् कर्त्तरि लट्। प्रकृत्यादिभ्य उपसंख्यानमिति (२·३·१८ पा·सू·स्थ·) वार्त्ति

आत्मानमात्मनावेत्सि सृजस्यात्मानमात्मना। आत्मनाकृतिनाचत्व मात्मन्येवप्रलीयसे ॥१०॥ द्रवःसङ्घातक
ठिनःस्थूलःसूक्ष्मोलघुर्गुरुः। व्यक्तोव्यक्तेतरश्चासि प्राकाम्यंते विभूतिषु ॥११॥ कात्तर्वभात्मनेति तृतीया। नहिते

प्रपञ्चस्येव ज्ञानोत्पत्तिलयेषु परापेक्षेति फलितार्थः १० द्रव इति। त्वमित्यनुषज्यते। हे भगवन् त्वं द्रवः सरित्समुद्रादिवद्द्रवात्मकोऽसि। सङ्घा
तेन निबिडसंयोगेन कठिनः महीधरादिवत्। स्थूलः इन्द्रियग्रहणयोग्यो घटादिवत्। सूक्ष्मोऽतीन्द्रियः परमाण्वादिवत्। लघुरुत्तनयोग्यस्तूला
दिवत्। गुरुर्हैमाद्रिवत् अचलनीयः व्यक्तः कार्य्यरूपोसि व्यक्तेतरः कारणरूपश्चासि। एवं विभूतिष्वणिमादिषु ते तव प्रकामस्य भावः प्राकाम्यं ३
यथाकामत्वम् ११ उद्धातइति। हे भगवन् यासां गिरां वाचाम् उद्धातः उपक्रमः प्रणव ओंकारात्मकः। ओंकारप्रणवौ समाविति स्यादभ्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दानमुदात्त आरम्भ इति चामरः। इदमुपसंहारस्याप्युपलक्षणम्। ब्रह्मणः प्रणवं कुर्य्यादादावन्ते च सर्वतः। स्रवत्यनोङ्कृतं पूर्वं परस्ताच्च विशीर्यत इति निरुक्तपरिशिष्टयोर्यास्कः। नीयन्ते एभिरर्थविशेषा इति न्यायाः स्वराः। उक्तञ्च। स्वरविशेषादर्थप्रतिपत्तिः यथेन्द्रशत्रुः स्वरतोऽपराधादिति यासां गिरां। त्रिभिर्न्यायैरुदात्तानुदात्तस्वरितैः स्वरैरुदीरणमुच्चारणम् यासां कर्म प्रतिपाद्यमित्यर्थः यज्ञो ज्योतिष्टोमादिः ननु चैत्यवन्दनादिरिति भावः। फलं स्वर्गः कर्मद्वारेति शेषः। कर्मस्वर्गौ ब्रह्मापवर्गयोरप्युपलक्षणम्। त्वं तासां गिरां वेदानामित्यर्थः। प्रभवत्यस्मादिति प्रभवः कारणम्।

उद्घातः प्रणवो यासां न्यायैस्त्रिभिरुदीरणम्। कर्म यज्ञः फलं स्वर्गस्तासां त्वं प्रभवो गिराम्॥१२॥ त्वामामनन्ति प्रकृतिं पुरुषार्थप्रवर्त्तिनीम्। तद्दर्शिनमुदासीनं त्वामेव पुरुषं विदुः॥१३॥

प्रणेता स्मर्तावाग्नतभेदेन १२ साङ्ख्यमतेनस्तुवन्ति। त्वामिति। हे भगवन् त्वां पुरुषस्यार्थौ भोगापवर्गरूपस्तदर्थं प्रवर्त्तत इति पुरुषार्थप्रवर्त्तिनीं तां प्रकृतिं त्रैगुण्यात्मकं मूलकारणम्। प्रकृतिः पञ्चभूतेषु प्रधाने मूलकारण इति यादवः। आमनन्ति कथयन्ति। म्ना अभ्यास इति धातोर्लट्। पाघ्राध्मास्थाम्नेत्यादिना (७, ३, ७८ पा०) मनादेशः। प्रकृतिपुरुषभेदाग्रहणात् प्रकृतिपुरुषाभेदव्यपदेशः। त्वामेव। तां प्रकृतिं साक्षित्वेन पश्यतीति तद्दर्शिनम् उदासीनं कूटस्थं पुरुषं विदुः विदन्ति। विदो लटो वेति (३, ४, ८३ पा०) झेर्जुसादेशः अजामेकां लोहितशुक्लकृष्णामिति श्रुतिरत्र प्रमाणम् १३ त्वमिति। हे भग-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कु.सं ४

गवन् त्वं पितॄणाम् अग्निष्वात्तादीनामपि पिता तेषामपि तर्पणीय इत्यर्थः। देवानामिन्द्रादीनामपि देवता तेषामपि यजनीय इत्यर्थः। परतोऽपि पर-
श्चासि सर्वोत्तरोऽसीत्यर्थः। इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः मनसश्च परा बुद्धिर्बुद्धेरात्मा महान्परः। महतः परमव्यक्तमव्यक्तात्पुरुषः प
रः। पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिरिति सर्वोत्तरत्वाभिधानात्। वेधसां दक्षादीनामपि विधाता स्रष्टासि १४ त्वमेवेति। शाश्वतिन्दः
शाश्वतः। शैषिको ऽण्णनप्रत्ययः। यद्यपि कालाट्ठञिति ठञपवादः अतएव सूत्रकारस्यापि प्रयोगः येषाञ्च विरोधः शाश्वतिकः (२,४,९ पा०)

त्वं पितॄणामपि पिता देवानामपि देवता। परतोऽपि परश्चासि विधाता वेधसामपि ॥१४॥ त्वमेव हव्यं होता च
भोज्यं भोक्ता च शाश्वतः। वेद्यञ्च वेदिता चासि ध्याता ध्येयञ्च यत्परम् ॥१५॥ इति तेभ्यः स्तुतीः श्रुत्वा यथा
र्थाहृदयङ्गमाः। प्रसादाभिमुखो वेधाः प्रत्युवाच दिवौकसः ॥१६॥

इति तथापि प्रयोगवशात्साधुरिति वामन इति
शाश्वतः प्रयुक्तः। शाश्वतस्त्वमेव। हूयत इति हव्यं हविराज्यादिकम्। जुहोतीति होता यजमानश्चासि। भोज्यमभ्यवहार्यमन्नम्। भोज्यं भक्ष्ये (७,
३,६९ पा०) इति निपातनात् कुत्वाभावः। भोक्ता अन्नादश्चासि। वेद्यं साक्षात्कार्यं वस्तु वेदिता साक्षात्कर्ता चासि। ध्याता स्मर्ता परतरं वस्तु ध्येयं
त्वमसि। साक्षात्कारसाधनभूत प्रत्यय विशेषप्रवाहो ध्यानम् १५ इतीति। वेधाः ब्रह्मा इति तेभ्यो देवेभ्यः। आख्यातो पयोगे (१.४.२९ पा०)

स० २

४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इत्यपादानत्वात्पञ्चमी । यथार्थाः सत्याः अतएव हृदयं गच्छन्तीति हृदयङ्गमाः मनोहराः । खच्प्रकरणे गमेः सुप्युपसंख्यानम् (८.३.२.३८ पा. वा.) इति खच्प्रत्ययः । अरुर्द्विषदजन्तस्य मुमिति (६.३.६७ पा.) मुमागमः । स्तुतीः स्तोत्राणि श्रुत्वा प्रसादाभिमुखोऽनुग्रहप्रवणः सन् दिवौकसो देवान् प्रत्युवाच १६ अथ कविराह पुराणस्येति । द्रव्यगुणक्रियाजातिभेदेन चत्वारोऽवयवा यस्या इति चतुष्टयी चतुर्विधा । संख्याया अवयवे तयप् (५.२.४२ पा.) इति तयप् । टिड्ढाणञ् द्वयसजित्यादिना (४,१,१५ पा.) ङीप् । शब्दानां प्रवृत्तिः वैखरी प्रमुखा वाग्वृत्तिः । उक्तञ्च । वैखरी

पुराणस्य कवेस्तस्य चतुर्मुखसमीरिता । प्रवृत्तिरासीच्छब्दानां चरितार्था चतुष्टयी ॥ १७ ॥ स्वागतं स्वानधीकारान् प्रभावैरवलम्ब्य वः । युगपद्युगबाहुभ्यः प्राप्तेभ्यः प्राज्यविक्रमाः ॥ १८ ॥

शब्दनिष्पत्तिर्मध्यमा श्रुतिगोचरा । द्योतितार्था च पश्यन्ती सूक्ष्मा वागनपायिनीति । पुराणस्य पुरातनस्य पृषोदरादित्वात्साधुः । कवेः कवयितुस्तस्य ब्रह्मणश्चतुर्भिर्मुखैः समीरिता सती । तद्धितार्थेत्यादिना (२.१.५१ पा.) उत्तरपदसमासः । समाहारे चतुर्मुखी स्यात् चतुर्मुखोच्चारणाच्चातुर्विध्यं सफलमासीदित्यर्थः १७ भगवानाह । स्वागतमिति । हे प्राज्यविक्रमाः प्रभूतपराक्रमाः देवाः । प्राज्यं भूरि प्रभूतञ्चेति यादवः । स्वान् स्वकीयानधीकारान् नियोगान् उपसर्गस्य घञीति (६.३.१२२ पा.) वा दीर्घः । प्रभावैः सामर्थ्यैः अवलम्ब्य आस्थाय यथाधिकारम् स्थित्वापीत्यर्थः युगपत्समकालं प्राप्तेभ्यः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कु·सं· युगपत्प्राप्त्या महत्कार्य्य मनुमीयत इति भावः। युगबाहुभ्यः दीर्घबाहुभ्य इत्यर्थः। आजानबाहुत्वं भाग्यलक्षणम्। बहुवचनस्य वस्त्रसाविति (३.१ स·
५ ५ पा·) वसादेशः कर्मणा यमभिप्रैतीत्यत्र (१·४·३२ पा·) कर्म पदेन क्रिया ग्रहणात्सं प्रदानत्वम्। स्वागतं शोभमानमागमनम्। काकुस्वानुस- २
न्धेया १८ किमिति। वत्सा इत्यनन्तरश्लोकीयं संबोधनमत्राप्यनुषञ्जनीयम्। हे वत्साः पुत्रकाः हिमेन नीहारेण क्लिष्टप्रकाशानि मन्दप्रभाणि
ज्योतींषि नक्षत्राणीव। दीप्तिना राहुनाशेषु ज्योतिरिति शाश्वतः। वो युष्माकं मुखानि पुरा यथा पूर्वमिव आत्मीयां द्युतिं न बिभ्रति इदं किं किं

किमिदं द्युतिमात्मीयांनबिभ्रतियथापुरा। हिमक्लिष्टप्रकाशानिज्योतींषीव मुखानिवः॥१९॥ प्रशमा
दर्च्चिषामेतदनुद्गीर्णसुरायुधम्। वृत्रस्यहन्तुःकुलिशंकुण्ठिताश्रीवलक्ष्यते॥२०॥

निबन्धनमित्यर्थः। किमिदमि-
त्यनेन वाक्यार्थः परामृश्यते १९ उक्तमेव प्रपञ्चयति सप्तभिः श्लोकैः प्रशमादित्यादिभिः। प्रशमादिति। अर्च्चिषां तेजसां प्रशमात् निर्वाणा
त् अनुद्गीर्ण सुरायुधम् अनुदितचित्रप्रभमित्यर्थः। एतत् वृत्रस्य हन्तुरिन्द्रस्य कुलिशं वज्रं कुण्ठिता अश्रयो यस्य तत् कुण्ठिताश्रि कुण्ठित-
कोटीव लक्ष्यते दृश्यते २० किञ्चेति। किञ्चायम् अरिदुर्व्वारो रिपुदुष्प्रधर्षः प्रचेतसो वरुणस्य। प्रचेता वरुणः पाशीत्यमरः॥ पाशो पाशर- ५
ज्जुरायुधविशेषः। मन्त्रेण गारुडेन हतवीर्य्यस्य प्रतिबद्धशक्तेः फणिनः सर्पस्य दैन्यं शोच्यत्वमाश्रितः। अत्र फणिनिष्ठदैन्यस्य पाशे असम्भ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वात् दैन्यमिव दैन्यमिति कल्पनादसंभवद्वस्तुसम्बन्धो निदर्शनालङ्कारः २१ कुबेरस्येति । अपविद्धा त्यक्ता गदा येन सः अपविद्धगदः अतएव भग्नशाखोद्रुम इव स्थितः कुबेरस्य बाहुः मनःशल्यं दुःखहेतुत्वान्मनसः शल्यमायमित्यर्थः । पराभवं शत्रुकृतमिति शेषः शंसतीव कथयतीव लक्षणया अनुमापयतीत्यर्थः बाहो मुख्यकथनस्यासम्भवात् इवशब्दोऽयतएव २२ यमोऽपीति । अस्तं नाशम् इताः प्राप्ताः अस्तमिति मकारान्तमव्ययम् । तस्य द्वितीयाश्रितातीतपतितगतात्यस्तप्राप्तापन्नैरिति (२.१.२४पा.) समासः । अस्तमितात्विषो यस्य तेन निस्तेज

किंवायमरिदुर्वारः पाणौपाशःप्रचेतसः । मन्त्रेण हतवीर्यस्य फणिनो दैन्यमाश्रितः ॥ २१ ॥ कुबेरस्यमनःशल्यंशंसतीवपराभवम् । अपविद्धगदोबाहुर्भग्नशाखइवद्रुमः ॥ २२ ॥ यमोऽपिविलिखन्भूमिंदण्डेनास्तमितत्विषा । कुरुतेऽस्मिन्नमोघेऽपि निर्वाणालातलाघवम् ॥ २३ ॥

स्केन दण्डेन यमोऽपि भूमिं विलिखन् अमोघेऽपि प्राणितिभावः अस्मिन् दण्डे निर्वाणालातस्य शान्तोल्मुकस्य । अलातं नाम भूलेखनशलाका तस्य यल्लाघवम् क्लैव्यं तत्कुरुते । अलातमुल्मुकं ज्ञेयमिति हलायुधः । निर्वाणोऽवात इति (८.२.५०पा.) निपातनान्निष्ठानत्वम् । अत्रापि लाघवमिव लाघवमिति कल्पनान्निदर्शनालङ्कारः २३ अमी इति । प्रतापक्षस्त्या तेजसां क्षयेण शीतला अमी आदित्याश्च द्वादशेति शेषः । कथं केन हेतुनेत्यर्थः । चित्रन्यस्ताश्चित्र लिखिता इव प्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कु॰ सं॰ कामम् अत्यन्तम् आलोकनीयतां दृश्यतां गताः प्राप्ताः २४ पर्य्याकुलत्वादिति । मरुतां वायूनां सप्तसप्तानामितिशेषः । पर्य्याकुलत्वात् स्खलि स॰
६ तगतित्वाद्धेतोर्वेगस्य भङ्गः अम्भसां जलानां प्रतीपगमनादुन्नानावरोहादित्यर्थः । ओघस्य संरोधः प्रवाहप्रतिबन्ध इव अनुमीयते २५ आवर्जि २
तेति । आवर्ज्जितेषु परिभवदुःखावनम्रेषु जटानां मौलिषु जटाजूटेषु विलम्बिन्यः संसक्ताः शशिकोटयश्चन्द्ररेखा येषां ते तथोक्ताः रुद्राणा

अमी च कथमादित्याः प्रतापक्षतिशीतलाः । चित्रन्यस्ता इव गताः प्रकामालोकनीयताम् ॥ २४॥ पर्याकुल
त्वान्मरुतां वेगभङ्गोऽनुमीयते । अम्भसामोघसंरोधः प्रतीपगमनादिव ॥ २५॥ आवर्ज्जितजटामौलिविल-
म्बिशशिकोटयः । रुद्राणामपि मूर्द्धानः क्षतहुङ्कारशंसिनः ॥ २६॥ लब्धप्रतिष्ठाः प्रथमं यूयं किं बलवत्तरैः ।
अपवादैरिवोत्सर्गाः कृतव्यावृत्तयः परैः ॥ २७॥

मपि एकादशानामिति शेषः । मूर्द्धानः क्षतं हुङ्कारं शंसन्तीति तथोक्ताः
हुङ्कारक्षत्यनुमापका इत्यर्थः । हुंकारशब्दा हि रुद्रा इति भावः २६ लब्धेति । प्रथमं पूर्व्वं लब्धप्रतिष्ठाः लब्धस्थितयः लब्धावकाशा इत्यन्यत्र यू
यं बलवत्तरैः पौरुषातिरेकात् प्रबलतरैः । निरवकाशैरित्यपरत्र परैः शत्रुभिः उत्सर्गाः सामान्यशास्त्राणि मा हिंस्यादित्येवमादीनि । अपोद्यन्ते एभि ६
रित्यपवादैः गामालभेतेत्यादिभिर्विशेषशास्त्रैरिव किं कृतव्यावृत्तयः कृतप्रतिष्ठाभङ्गाः कृतविषयसङ्कोचरूपबाधा इत्यन्यत्र । विषयसङ्कोच

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एव बाधइत्याचार्य्यः। निषेधशास्त्रस्य वैदिकहिंसापरिहारेण लौकिकमात्रे व्यवस्थापनात् विषयसङ्कोच इत्यलमतिगहनावगाहनेन २७ तदिति। तत्तस्मात्का-
रणात् हे वत्साः पुत्रकाः। वत्सस्त्वर्भकपुत्राद्योर्वर्षे वत्सन्तु वक्षसीति विश्वः। स्वयंपितामहत्वाद्वत्सा इत्यामन्त्रयते। सम्भूय आगताः समागताः इतोमत्तः किं
प्रार्थयध्वं किमिच्छतेत्यर्थः। ब्रूत लोकरक्षणे यूयमेव कर्त्तारइत्याह मयि लोकानां सृष्टिः, रक्षा युष्मासु अवस्थिता अनस्तदर्थमपि नास्ति मदपेक्षेत्यर्थः २८
तत इति। ततो भगवत्सम्भाषानन्तरं वासव इन्द्रः गुरुं बृहस्पतिं " गुरूगीष्पतिपित्राद्यावि "त्यमरः। मन्दानिलोद्धूततोयः कमलाकरः सइव शोभतइतिने

तद्ब्रूतवत्साःकिमितः प्रार्थयध्वंसमागताः। मयिसृष्टिर्हिलोकानांरक्षायुष्मास्ववस्थिता ॥२८॥ ततोम
न्दानिलोद्धूतकमलाकरशोभिना। गुरुंनेत्रसहस्रेणनोदयामासवासवः ॥२९॥ सद्विनेत्रंहरेश्चक्षुः सह-
स्रनयनाधिकम्। वाचस्पतिरुवाचेदंप्राञ्जलिर्जलजासनम् ॥३०॥

न तयोक्तेन नेत्राणां सहस्रेण नोद-
यामास प्रेरयामास। सहस्रग्रहणमास्थातिशयार्थम्। अनिमेषाणामपि प्रयत्नवशादक्षिणस्पन्दो न विरुध्यते २९ सइति। हरेरिन्द्रस्य। इं-
द्रोदुश्च्यवनो हरिरिति हलायुधः। सहस्राान्नयनेभ्योऽधिकं सहस्रनयनाधिकं तदगोचरदर्शित्वादितिभावः। द्वे नेत्रे यस्य तत् द्विनेत्रम् प्र
सिद्धाच्चक्षुषोऽयं विशेषइत्यर्थः। चक्षुश्चक्षुर्भूतः। चक्षुषस्त्वारोपस्य प्रकृतोपयोगात्परिमाणामालङ्कारः। स वाचस्पतिः। कस्मादि(८,२)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२८ पा॰) स्वादल्लुक्सत्वे । षष्ठ्याः पतिपुत्रेभ्यादिना (८, ३, ५३ पा॰) सत्वमिति स्वामी तन्न छन्दो विषयत्वात् । प्राञ्जलिः सन् जलजासनं ब्रम्हणमि दमुवाच ३० एवमिति । हेभगवन् षड्गुणैश्वर्यसम्पन्न यदात्थ कृतव्याहृतयः परैरिति यद्ब्रवीषि । ब्रुवः पञ्चानाम् (३, ४, ८४, ५ पा॰) इत्यादिना हादेशः । वर्त्तमानसामीप्ये वर्त्तमानवद्वेति (३, ३, १३१ पा॰) वर्त्तमानप्रयोगः । वामनस्तु भ्रान्तोऽयं प्रयोगइत्याह । आहेति भूते पालन्ते भ्रमव- दिति । आहेत्युपलक्षणम् । तदेवं सत्यं नोऽस्माकं पदम् अधिकारः परैः शत्रुभिः आमृष्टम् आक्षिप्तम् । हेप्रभो प्रत्येकं प्रतिपुरुषं विनियुक्तात्मा प्रवे-

एवंयदात्थभगवन्नामृष्टंनःपरैःपदम् । प्रत्येकंविनियुक्तात्माकथंनज्ञास्यसिप्रभो ॥३१॥ भवल्लब्ध
वरोदीर्णस्तारकाख्योमहासुरः । उपप्लवायलोकानां धूमकेतुरिवोत्थितः ॥३२॥

शितस्वरूपः सर्व्वान्तर्यामी- त्यर्थः । कथं न ज्ञास्यसिन वेत्सि । वर्त्तमानेऽपि वचनभङ्ग्या भविष्यन्निर्देशः प्रसिद्धः । अपन्हवे ज्ञः अकर्मकाच्चेत्या (१, ३, ४४. ४५ पा॰) त्म- नेपदविकल्पः ३१ उक्तमेव प्रपञ्चयति । भवल्लब्धइति । भवतस्त्वत्तो लब्धेन वरेणोदीर्ण उन्द्धतः । तारकइत्याख्या नामधेयं यस्य सः तारकाख्यः । महान सुरोमहासुरः । सन्महपरमोत्कृष्टाः पूज्यमानैरिति (२, १, ६१ पा॰) तत्पुरुषः । धूमकेतुरुत्पातविशेषइव लोकानामुपप्लवाय उपद्रवाय उ- त्थितः उत्पन्नः ३२ पुरइति । अस्य तारकस्य पुरे रविः सूर्य्यः तावन्तं तावन्मात्रमेव आतपं तनोति । यावन्मात्रेण यावते वयावती मात्रामिति-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्यस्य यावन्मात्रं तेनवा । अल्पपरिमाणेनेत्यर्थः । मात्रा परिच्छेदे अल्पेच परिमाणे । मात्रं कार्त्स्न्येऽव धारण इत्यमरः दीर्घिकासु क्रीडावापीषु कमलानामुन्मेषो विकाशः साध्यते निष्पाद्यते । कठोरकिरणोऽपि मन्दोष्णः सन्नेव तद्भीत्या पुरे प्रकाशत इत्यभिप्रायः ३३ सर्व्वाभिरिति । चन्द्रस्तं तारकं सर्व्वदा कृष्णपक्षेऽपीत्यर्थः । सर्व्वाभिः कलाभिः निषेवते । कलातु षोडशो भाग इत्यमरः । केवलां हरचूडामणीकृतां शिवशिरोमणीकृतां लेखां नादत्ते न गृह्णाति ३४ व्यावृत्तेति । वायुः स्तेनस्य भावः कर्मवा स्तेयं चौर्य्यम् । स्तेनाद्यन्नलोपश्चेति (५

पुरे तावन्तमेवास्य तनोति रविरातपम् । दीर्घिकाकमलोन्मेषो यावन्मात्रेण साध्यते ॥ ३३ ॥ सर्व्वाभिः सर्व्वदा चन्द्रस्तं कलाभिर्निषेवते । नादत्ते केवलां लेखां हरचूडामणीकृताम् ॥ ३४ ॥ व्यावृत्तगतिरुद्याने कुसुमस्तेयसाध्वसात् । न वाति वायुस्तत्पार्श्वे तालवृन्तानिलाधिकम् ॥ ३५ ॥

१, १२५ पा०) यत्प्रत्ययः नलोपश्च । कुसुमानां स्तेयं तस्मात् स्तेयाभियोगात् दण्डाद्वा साध्वसं भयं तस्माद्धेतोः उद्याने व्यावृत्तगतिर्निवृत्तोद्यानसञ्चारः सन्नित्यर्थः । सापेक्षत्वेऽपि गमकत्वात्समासः । तत्पार्श्वे तत्समीपे । तालस्य वृन्तैरुद्ग्रथ्यते तालस्येव वृन्तमस्येति वा तालवृन्तं तस्यानिलात् व्यजनसञ्चारपवनात् अधिकं यथा तथा न वाति । व्यजनं तालवृन्तकमित्यमरः ३५ पर्य्यायेति । ऋतवः षट् वसन्तादयः पर्य्यायसेवा क्रमसेवा मुत्-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कु॰सं॰ सृज्य पुष्पाणां सम्भारे संग्रहे तत्पराः आसक्ताः सन्तइत्यर्थः। तत्परे प्रसितासक्तावित्यमरः। उद्यानपालैरुद्यानाधिकृतैः सामान्यं साधारणम् यथा- स॰
८ भवति तथा तं तारकमुपासते सेवन्ते। शीतोष्णादिदोषप्रकाशनन्तु दूरापास्तमित्यर्थः ३६, तस्येति। सरितांपतिः समुद्रः तस्य तारकस्य उपा- २
यनानां प्राभृतानां योग्यानि। प्राभृतं तु प्रदेशनम्, उपायनमित्यमरः। रत्नानि अम्भसामन्तः आ निष्पत्तेः परिपाकपर्यन्तम्। विकल्पादसमासः
कथमपि महता यत्नेन प्रतीक्षते कदा वा परिपच्येरन्निति सैकाग्र्येण पालयतीत्यर्थः ३७ ज्वलदिति। किञ्चेति चार्थः ज्वलन्तो मणीनां शि

पर्य्यायसेवामुत्सृज्य पुष्पसम्भारतत्पराः। उद्यानपालसामान्यमृतवस्तमुपासते ॥३६॥ तस्योपायनयोग्या-
नि रत्नानि सरितांपतिः। कथमप्यम्भसामन्तरानिष्पत्तेः प्रतीक्षते ॥३७॥ ज्वलन्मणिशिखाश्चैनं वासुकिप्रमु-
खा निशि। स्थिरप्रदीपतामेत्य भुजङ्गाः पर्य्युपासते ॥३८॥ तत्कृतानुग्रहापेक्षी तमुहुर्दूतहारितैः। अनुकूलय-
तीन्द्रोऽपि कल्पद्रुमविभूषणैः ॥३९॥

रोरत्नानां शिखाः ज्वालाः येषान्ते वासुकिप्रमुखाभुजङ्गाः सर्पाः सि-
द्धाश्च ध्वन्यन्ते। भुजङ्गः सिद्धसर्पयोरित्यमरः निशि स्थिरप्रदीपतामनिर्वाणदीपत्वमेत्य एनं तारकं पर्य्युपासते परिवृत्य सेवन्ते- ८
३८ तत्कृतेति इन्द्रोऽपि तेन तारकेण कृतं तत्कृतमनुग्रहं प्रसादम् अपेक्षत इति तथोक्तः सन् मुहुर्दूतहारितैः दूतप्रापितैः कल्पद्रुमाणां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विभूषणैस्तत्यसूनैरित्यर्थः । तं तारकम् अनुकूलयति अनुकूलं करोति ३९ इत्थमिति । इत्थम् उक्तप्रकारेण रविशशिपवनोदधिभुजंगमसुरेन्द्रैराराध्य मानोऽपि भुवनत्रयं क्लिश्नाति पीडयति । तथाहि दुर्जनः प्रत्यपकारेण प्रतीकारेणैव शाम्येत् शान्तो भवेत् उपकारेण तु न शाम्येत् प्रत्युत प्रकुप्यतीति भावः ५० तेनेति । तेन तारकेण अमरवधूहस्तैः सुकुमारैरिति भावः । तैरपि सदयम् आलूनाः अवतंसार्थं छिन्नाः पल्लवा येषां ते नन्दनद्रुमाः । छेदाश्च पाताश्च छेदपाताः तेषाम् अभिजानंतीत्यभिज्ञाः कृद्योगात्कर्मणि षष्ठी क्रियन्ते ४१ बीज्यत इति । हि यस्मात्कारणात् स तारकः सं

इत्थमाराध्यमानोऽपि क्लिश्नाति भुवनत्रयम् । शाम्येत् प्रत्यपकारेण नोपकारेण दुर्ज्जनः ॥ ५० ॥ तेनामरवधूहस्तैः सदयालूनपल्लवाः । अभिज्ञाश्छेदपातानां क्रियंते नन्दनद्रुमाः ॥ ४१ ॥ वीज्यते स हि संसुप्तः श्वाससाधारणानिलैः । चामरैः सुरबन्दीनां बाष्पशीकरवर्षिभिः ॥ ४२ ॥

सुप्तः सन् श्वाससाधारणो निश्वाससमानः अनिलो येषां तैः ततोऽप्याऽधिक्ये निद्राभङ्गभयादिति भावः । बाष्पशीकवर्षिभिः । तासां स्त्रीणां सम्बन्धिभिः प्रग्रहोपग्रहौ बन्द्यामित्यमरः । चामरैर्वीज्यते ४२ उत्साद्येति । तेन तारकेण हरितां सूर्याश्वानाम् । हरित् सूर्ये च सूर्याश्वे वर्णेच हरिते दिशीति विश्वः । खुरैः शफैः क्षुण्णानि चूर्णितानि । एतेन तेषामत्यौन्नत्यं सूचितम् । मेरुशृङ्गाण्युत्पाट्य स्वेषु वेश्मसु वेश्मस्थिति बहुवचनेनास्य भुवनत्रयनिवासः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कु॰ सं॰ १

सूचितः । आक्रीडन्ते एष्विन्त्याक्रीडाः तेन ते पर्वताः कल्पिताः कृताः ४३ मन्दाकिन्याइति । सांप्रतं संप्रति मन्दाकिन्याः भागीरथ्यादिग्वारणानां दिग्ग
जानां मदैराविलं कलुषं पयो जलमेव शिष्यत इति शेषम् शिष्टम् । कर्मण्यण्प्रत्ययः । त्रिष्वन्यत्रोपयुज्यत इति नपुंसकत्वम् । तर्हि कनककमलानि
कगतानीत्याह हेमेति । हेमाम्भोरुहाण्येव शस्यानि तेषान्तु तस्यवाप्यः तद्वाप्यएव धाम स्थानम् । सर्व्वाएव प्युत्पाद्य स्वदीर्घिकास्येव प्रतिरोपि
तवानित्यर्थः ४४ भुवनेति तस्य तारकस्य आपातात् समापत्तेः भयात् विमानानां पथि खिलीभूते अपहतीभूते सति । द्वे खिला प्रहते समे इ

उत्पाट्य मेरुशृंगाणि क्षुण्णानि हरितांकुरैः । आक्रीड पर्वतास्तेन कल्पिताः स्वेषुवेश्मसु ॥४३॥ मन्दाकिन्याः
पयःशेषं दिग्वारणमदाविलम् । हेमांभोरुहशस्यानां तद्वाप्यो धामसांप्रतम् ॥४४॥ भुवनालोकन प्रीतिः स्व
र्गिभिर्नानुभूयते । खिलीभूते विमानानां तदापातभयात्पथि ॥ ४५॥ यज्वभिः सम्भृतं हव्यं विततेष्वध्वरे
षुसः । जातवेदोमुखान्मायी मिषतामाच्छिनत्तिनः ॥४६॥ त्यमरः । स्वर्गिभिर्देवैर्भुवनानामालोकने प्रीतिर्नानु

भूयते ४५ यज्वभिरिति । यज्वभिर्विधिवदिष्टवद्भिः यज्वा तु विधिनेष्टवानित्यमरः सुयजोर्ङ्वनिप् (३,२,१०३ पा॰) इति ङ्वनिप्प्रत्ययः । १
विततेष्वध्वरेषु यज्ञेषु सम्भृतं दत्तं हव्यं हविः मायी मायावी । (५, २, ११६ पा॰) व्रीह्यादित्वादिनिप्रत्ययः । सतारको नोऽस्माकं मि-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षतां पश्यतां पश्यत्स्क सन्नस्वित्यर्थः । षष्ठी चानादरे (२,३,३८ पा०) इति षष्ठी जातवेदा वन्हिरेव मुखं तस्माज्जातवेदो मुखान् आ
च्छिनत्ति आक्षिप्य गृह्णातीत्यर्थः ४६. उच्चैरिति । किञ्चेति चार्थः । तेन तारकेण उच्चैरुन्नतः उच्चैःश्रवा नाम हयो रत्नमिव हयरत्नम् अश्वश्रे
ष्ठः । रत्नं श्रेष्ठे मणावपीति विश्वः । अस्य शक्यत्वादुत्प्रेक्षते । देहबन्धं बन्धदेहं मूर्तिमदित्यर्थः । (२,२,३७ पा०) आहिताग्न्यादित्वान्निष्ठा
याः परनिपातः । चिरकालार्जितम् इन्द्रस्य यशइव अहारि अपहृतम् ४७ तर्हि सामाद्युपायास्तत्र कथं न प्रयुक्ता इत्यत आह । तस्मिन्निति ।

उच्चैरुच्चैःश्रवास्तेन हयरत्नमहारि च । देहबद्धमिवेन्द्रस्य चिरकालार्जितं यशः ॥ ४७ ॥ तस्मिन्नुपायाः
सर्वे नः क्रूरे प्रतिहतक्रियाः । वीर्यवन्त्यौषधानीव विकारे सान्निपातिके ॥ ४८ ॥ जयाशा यत्र चास्माकं प्रति-
घातोत्थितार्चिषा । हरिचक्रेण तेनास्य कण्ठे निष्कमिवार्पितम् ॥ ४९ ॥

क्रूरे । घातुके । नृशंसो घातुकः क्रूर इ-
त्यमरः । तस्मिन्नसुरे नोऽस्माकं सर्वे उपायाः सन्निपातदोषत्रयस्य प्रकोपजे सान्निपातिके विकारे ज्वरादौ । सन्निपाताच्चेति (५.३१ पा०
वा०) वक्तव्यात्ठक् । वीर्य्यवन्ति सारवन्ति औषधानीव प्रतिहतक्रियाः विफलप्रयोगा भवन्ति ४८ तर्हि प्रतिहतक्रियत्वमाह । जयेति । कि-
ञ्चेति चार्थः नूनमनेन हरिचक्रेण वयं जेष्याम इति यत्र हरिचक्रे अस्माकं जयाशा विजयाशंसा आसीदिति शेषः । प्रतिघातेन प्रतिहत्या उत्थितार्चि

कु॰सं॰ षा उद्गतेन तेजसा तेन हरिचक्रेण विष्णोः सुदर्शनेन अस्य तारकस्य कण्ठे निष्कमुरोभूषणमर्पितमिवेत्युत्प्रेक्षा। स्वयमेव निष्कमिव स्थितमि- स॰
१० त्यर्थः। तारकशिरश्छेदाय हरिणा चक्रं त्यक्तं तदपि नष्टशक्ति जातमिति भावः। साष्टे शते सुवर्णानां हेम्न्युरोभूषणे पले। दीनारेऽपि च निष्कोऽ २
स्त्रीत्यमरः। ४९ तदीया इति। अथ संप्रति निर्जितैरावतो यैस्ते तथोक्ताः तस्य तारकस्य इमे तदीयाः गजाः। पुष्कराश्च आवर्तकाश्च नाम
आद्यो येषां तेषु तोयदेषु मेघेषु तटाघातं वप्रक्रीडामभ्यस्यन्ति ५० तदिति। तत्तस्मात्कारणात् हे विभो स्वामिन् मोक्तुं भवं त्यक्तुम् इच्छवो मु-

तदीयास्तोयदेष्वद्य पुष्करावर्तकादिषु। अभ्यस्यन्ति तटाघातं निर्जितैरावता गजाः ॥ ५० ॥ तदिच्छामो वि-
भो स्रष्टुं सेनान्यं तस्य शान्तये। कर्मबन्धच्छिदं धर्मं भवस्येव मुमुक्षवः ॥ ५१ ॥ गोप्तारं सुरसैन्यानां यं पुर-
स्कृत्य गोत्रभित्। प्रत्यानेष्यति शत्रुभ्यो बन्दीमिव जयश्रियम् ॥ ५२ ॥

मुक्षवः विरक्ताः भवस्य संसारस्य शान्तये नि-
वृत्तये कर्मैव बन्धः तं छिनत्तीति कर्मबन्धच्छिद् तं धर्ममिव आत्मज्ञानहेतुभूतमिति शेषः तमेव विदित्वातिमृत्युमेतीति ज्ञानादेव मुक्तिः। तस्य ता-
रकस्य शान्तये नाशाय। सेनां नयतीति सेनानीः चमूपतिः सत्सूद्विषेत्यादिना (३,२,६१ पा॰) क्विप्। तं सेनान्यं कञ्चित् स्रष्टुमिच्छामो वयमिति शेषः १०
५१ सेनानीसृष्टेः फलमाह। गोप्तारमिति। सुरसैन्यानां देवतासेनानां गोप्तारं रक्षितारं यं सेनान्यं पुरस्कृत्य पुरोधाय। पुरोऽव्ययमिति (१.४.६७ पा॰)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गतिस्त्वान् नमस्पुरसोर्गत्योः (८,३,४०पा०) इति सकारः। गां पृथ्वीं त्रायन्त इति गोत्रास्तान् भिनत्तीति गोत्रभिदिन्द्रः जयश्रियं बन्दीमिव बन्दीकृताम् स्त्रियमिव शत्रुभ्यः सकाशात् प्रत्यानेष्यति प्रत्याहरिष्यति तं स्त्रष्टुमिति पूर्वेण सम्बन्धः ५२ वचसीति। तस्मिन्बार्हस्पत्ये वचसि अवसिते परिसमाप्ते सति आत्मभूर्ब्रह्मा गिरं वाचं ससर्ज्ज जगादेत्यर्थः। सागीः सौभाग्येन मनोहरत्वेन। लृड्गसिन्ध्वन्ते पूर्वपदस्य (७.३.१९पा०) चेत्युभयपदवृद्धिः। गर्जिताद्गर्जितस्य वा अनन्तरं प्रवृत्तां वृष्टिं जिगाय जितवती। गर्जितपरत्वाद्वृष्टेरिव तद्विज्ञानफलत्वाद्गिरः सुभगत्वमिति-

वचस्यवसिते तस्मिन् ससर्ज गिरमात्मभूः। गर्जितानन्तरं वृष्टिं सौभाग्येन जिगाय सा॥ ५३॥ सम्पत्स्यते वः कामोऽयं कालः कश्चित्प्रतीक्ष्यताम्। नत्वस्य सिद्धौ यास्यामि सर्वव्यापारमात्मना॥ ५४॥ इतः स दैत्यः प्राप्तश्रीर्नेत एवार्हति क्षयम्। विषवृक्षोऽपि संवर्द्ध्य स्वयं छेत्तुमसाम्प्रतम्॥ ५५॥

भावः ५३ सम्पत्स्यत इति।

अयं वो युष्माकं कामः मनोरथः सेनानीरूपः सम्पत्स्यते सेत्स्यति। कश्चित् कियानपि कालः प्रतीक्ष्यताम्। तु किन्तु अस्य सेनान्यः सिद्धौ विषये आत्मना स्वयं सर्गः सृष्टिरेव व्यापारस्तं न यास्यामि नाहं स्त्रक्ष्यामीत्यर्थः ५४ कुत इत्याशङ्क्याह इतइति। इतो मत्त एव प्राप्तश्रीर्लब्धोदयः स दैत्यस्तारकासुरः इतो मत्त एव क्षयं नाशं नार्हति। न था हि। अन्योवृक्षस्तावदास्तां विषस्य वृक्षो विषवृक्षोऽपि संवर्द्ध्य कुतश्चित्कार-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कु·सं·
११

पात् सम्यक् वर्द्धयित्वा स्वयंछेत्तुम् असाम्प्रतम् अनर्हः। असाम्प्रत मित्यनेन निपातेनाभिहितत्वात् इति द्वितीयाऽन्तो न भवति अ-
नभिहिते कर्म्मणि द्वितीयाभिधानात् यथाह वामनः निपातेनाप्यभिहिते कर्म्मणि न विभक्तिः परिगणनस्य प्रायिकत्वादिति ५५ वृतमि
ति प्राक्पूर्वं तेन असुरेणेदमेव देवैरवध्यत्वमेव वृतं प्रार्थितम्। मयाचास्मै तारकाय प्रतिश्रुतं प्रतिज्ञातम्। प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्त्तेति
(१.४.४०पा०) सम्प्रदानत्वाच्चतुर्थी कर्त्तव्यश्चैतदित्याह लोकान् दग्धुम् अलं शक्तम्। पर्य्याप्तिवचने ष्वलमर्थेष्विति (३.४.६६पा·)

वृतं तेनेदमेव प्राक् मयाचास्मै प्रतिश्रुतम्। वरेणशमितं लोकानलं दग्धुं हितत्तपः॥५६॥ संयुगे
सांयुगीनं तमुद्यन्तं प्रसहेत कः। अंशाहृते निषिक्तस्य नीललोहितरेतसः॥५७॥

तुमुन् प्रत्ययः। नस्य तप-
स्तत्तपः वरेण वरदानेन शमितं हिमयेति शेषः ५६. संयुग इति संयुगे युद्धे उद्यन्तं व्याप्रियमाणम्। संयुगे साधुं सांयुगीनम्। प्रति जना-
दिभ्यः खञिति (४·४· ९९ पा·) खञ् प्रत्ययः। तं तारकं निषिक्तस्य क्वचित् क्षेत्रे क्षरितस्य। नीलः कंठे लोहितश्च केशेष्विति नीललो-
हित इति पुराणमिति स्वामी। तस्य नीललोहितस्य धूर्ज्जटे रेतसः शुक्रस्य अंशाहृते अंशं विना अन्यः कः प्रसहेत अभिभवेत्। प्र ११
सह नमभिभव इति वृत्तिकारः ५७ कथमसावीदृक् शक्तिरित्याह सइति। स देवो नीललोहितः तमसः पारे पारतो व्यवस्थितम् त-

सं·
२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मोगुणातीतम् परंज्योतिः परमात्मा हि अत एव मया परिच्छिन्नप्रभावर्द्धिः अवगाढमहिमातिशयो न भवति तथा विष्णुना चन, अतस्तस्या साध्यं नास्तीत्यर्थः ५८ सम्प्रति तदंशोत्पत्त्या वुपायं दर्शयति। उमेति। ते कार्य्यार्थिनो यूयं संयमस्तिमितं समाधिनिश्चलं शंभोर्मनः उमारूपेण उमासौन्दर्येण। रूपं स्वभावे सौन्दर्ये नाणके पशुशब्दयोः ग्रन्थावृत्तौ नाटकादावाकारश्लोकयोरपीति विश्वः। अयस्कान्तेन मणिविशेषेण। कस्कादिषु चेति (८.३.४८पा.) सकारः। लोहवत् अयोधातुमिव। तेन तुल्यं क्रियाचे द्वतिरिति (५.१.११५पा.) वतिप्रत्ययः यो मृग्यः आक्रष्टु माह्

सहिदेवःपरंज्योतिस्तमःपोरव्यवस्थितम्। परिच्छिन्नप्रभावर्धिर्नमयानचविष्णुना॥५८॥ उमारूपे णतेयूयंसंयमस्तिमितंमनः। शम्भोर्यतध्वमाक्रष्टुमयस्कान्तेन लोहवत्॥५९॥ उभेएवक्षमेवोढुमुभयोर्बीजमाहितम्। सावा शंभोस्तदीयावामूर्तिर्जलमयीमम॥६०॥

ष्टुं यतध्वम् उद्युक्ता भवत ५.९ नच गत्यन्तरमस्तीत्याह। उमे इति। उभयोः शम्भोर्मम च आहितं निषिक्तं बीजं तेजः वोढुं सोढुं सा उमा वा शम्भोरष्टमूर्त्तेः तस्य इयं तदीया जलमयी मूर्तिर्वा मम। उभे एव क्षमे न तृतीयेत्यर्थः। वा शब्दो द्वंद्वार्थेनत्वन्यार्थे। एतदेवोदाहृत्य इत्थमेव व्याख्यानं गणव्याख्याने। अत्र दीपकालङ्कारः प्राकरणिकयो रुमामहेश्वरयोरप्राकरणिकयोर्ब्रम्हजलमूर्त्योश्च औ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पमस्य गम्यत्वात्। तथाह भोजराजः। प्रस्तुतानामप्रस्तुतानाञ्चौपम्यस्य गम्यत्वे दीपकमिति। न चेयं तुल्ययोगिता तस्याः केवल प्र-
स्तुतविषयत्वेन केवलाप्रस्तुतत्वेन चोत्थानादिति ६० तस्येति। तस्य शितिकण्ठस्याष्टमूर्त्तेः आत्मा पुत्र इत्यर्थः। आत्मा वै पुत्र नामासीति श्रुतेः
। वो युष्माकं सेनापतेर्भावः सैनापत्यम्। पत्यन्तपुरोहितादिभ्यो यगिति (५.१.१२८ पा॰) यक् प्रत्ययः उपेत्य प्राप्य वीर्य्यविभूतिभिः शौ-
र्य्यसम्पत्तिभिः सुरबन्दीनां वेणीर्मोक्ष्यते विस्रंसयिष्यति तारकासुरं हनिष्यतीति भावः ६१ इतीति। विश्वस्य योनिः कारणम् योनिः स्त्रीणां

तस्यात्माशितिकंण्ठस्य सेनापत्यमुपेत्यवः। मोक्ष्यते सुरबन्दीनां वेणीर्वीर्यविभूतिभिः ॥६१॥ इतिव्या
हृत्य विबुधान् विश्वयोनिस्तिरोदधे। मनस्याहितकर्त्तव्यास्ते ऽपि देवा दिवं ययुः ॥६२॥

स्थानभेदे कारणे ताम्रिके पण इति वैजयन्ती। विबुधान् सुरान् इति व्याहृत्य अभिधाय तिरोदधे अन्तर्हितवान्। ते देवा अपि मनसि आहि-
तं कर्त्तव्यं यैस्ते तथोक्ताः सन्तः दिवं स्वर्गं ययुः प्रापुः ६२ तत्रेति। पाको नाम कश्चिदसुरः तस्य शासन इन्द्रः तत्र हरिचिन्ताकर्षणाकु-
ल्ये कंदर्पं निश्चित्य साधकत्वेनेति शेषः। कार्यसंसिद्धौ त्वरया औत्सुक्येन द्वौ गुणौ यस्य तद्द्विगुणं. द्विरावृत्तं रंहो वेगो यस्य तेन त- १२
थोक्तेन। गुणस्तु। वृत्तिशब्दा। द्विज्येन्द्रियः सुरव्यजन्तुष्विति वैजयन्ती। मनसा अगमत् सस्मारेत्यर्थः गमेर्लुङि च्लेरङादेशः ६३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथेति। अथ स्मरणानन्तरं स स्मृत इत्यर्थः। पुष्पं धनुर्यस्य स पुष्पधन्वा कामः। वा संज्ञायाम् (५.४.१३३ पा.) इत्यनङ्। ललितं विषु सुंदरमित्यमरः। ल-
लिनायाः सुन्दर्याः योषितः भ्रुवौ लते इव चारुणी शृङ्गे कोटी यस्य तत्तथोक्तं चापम्। रतिः स्मरप्रिया। रतिः स्मरप्रियायामित्यमरः। तस्याः वलयपदानि कङ्क-
णस्थानानि अङ्कश्चिह्नं यस्य स तथोक्ते कण्ठे आसज्य लगयित्वा। चापकंठविशेषणाभ्यां शृंगारैकनिधेः त्रिभुवनैकवीरस्य शृंगारवीरोपकरणेषु तुल्य रसत

तत्रनिश्चितकन्दर्पमगमत्पाकशासनः। मनसा कार्य्यसंसिद्धित्वराद्विगुणरंहसा ॥ ६३ ॥ अथस ललितयोषिद्भ्रूलता
चारुशृङ्गं रतिवलयपदांके चापमासज्य कण्ठे। सहचरमधुहस्तन्यस्तचूताङ्कुरास्त्रः शतमखमुपतस्थे प्राञ्जलिः पुष्पधन्वा ॥
६४ ॥ ॥ इतिश्रीकालिदासकृतौ कुमारसम्भवे महाकाव्ये ब्रह्माभिगमनो नाम द्वितीयः सर्गः ॥ २ ॥ ॥ छ ॥ छ

व्यज्यते। सहचरस्य सख्युर्मधोर्वसन्तस्य हस्ते न्यस्तं चूताङ्कुर एव अस्त्रं यस्य स तथोक्तः। प्राञ्जलिः कृताञ्जलिः सन् शतमखमिन्द्रमुपतस्थे सङ्गतवा
न् (१.३.२५ पा. वा.) सङ्गतिकरणार्थादात्मनेपदम्। अत्र स्वभावोक्तिः। स्वभावोक्तिरलंकारो यथावद्वस्तुवर्णनमिति। मालिनीवृत्तमेतत्। न न म य य
युतेयं मालिनी भोगिलोकैरिति तल्लक्षणात्। ६४ इतिमहामहोपाध्याय कोलाचलमल्लिनाथसूरिविरचितायां कुमारसम्भवव्याख्यायां सञ्जीवनी समाख्या
यां द्वितीयः सर्गः ॥ २ ॥ छ ॥ छ ॥ हें पुस्तक मुंबई एथें काशिनाथ बाळकृष्ण खांडेकर याणीं सत्यवक्ता छापखान्यांत छापविलें असे. शके १७९२ चैत्रमासः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इतिकुमारसंभवे द्वितीयसर्गः समाप्तः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=02.12.19 10:54
,TRANSFERRED=2019/12/02 at 10:58:17
,PAGES=28
,TYPE=STD
,NAME=S0002242
,Book Name=M-307-BHARAT CHAMPU
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection